THE BHĀSKARA BHŪṢAṆA OF SŪRYA PAṆḌITA

By K. Madhav Krishna Sarma, M. O. L.
(Curator, Anup Sanskrit Library, Bikaner).

This edition of the Bhāskara Bhūṣaṇa is based on a single MS. deposited with the number 4763 in the Anup Sanskrit Library. No other MS. of the work has yet come to light. The MS. contains 17 folios of the size of 8″ × 4″ with 7 lines per page and 27 syllables per line of medium bold Devanāgarī. Its condition is good. The date is given as Śaka 1494 (A.D. 1572) at the end :

वेदग्रहशक्रमिते वत्सरे माधवे त्विदम् ।
सूर्यज्योतिर्विदोऽधीत्य गोपीराजोऽलिखत्स्वयम् ॥

A later hand in the lower margin suggests the correction of वेदग्रहशक्रमिते into वेदग्रहेन्द्रप्रमिते. From this endorsement it is clear that this copy was made in the time of the author himself. It is generally accurate, and hence there has not been any necessity for speculative additions or alterations.

The author Sūrya Paṇḍita, son and pupil of Jñānarāja, of Pārthapura on the bank of the Godāvarī, a versatile genius of the sixteenth century, needs no introduction to Sanskrit scholars. Besides being one of the great astronomers of the post-Bhāskara period and a noteworthy poet of his times, he wrote philosophic works and commented on the Vedas. He wrote his Sūryaprakāśa, a commentary on the Bījagaṇita of Bhāskara in Śaka 1460 (A.D. 1538) when he was only 31 years of age. According to this, he was born in A.D. 1507–8. The Bhāskarabhūṣaṇa, a very fine astronomical and devotional poem in one hundred and one verses, addressed to the Sun, the Parabrahman of the Sūryādvaitavādins, is not included in an account of Sūrya Paṇḍita's works by S. B. Dikshit (History of Indian Astronomy, 2nd ed. p. 271), nor does Aufrecht notice this in his Catalogus Catalogorum (I, 371). Another work of our author to which there is a brief reference in Colebrooke's essays (2nd ed. II, 451) is the Siddhānta Saṁhitāsārasamuccaya, which has become very rare now. There is a MS. of this in the Anup Sanskrit Library, and I have taken up the work for editing in the Ganga Oriental Series. My thanks are due to Prof. N. A. Gore, Editor of the Poona Orientalist, for inclusion of the present work in this Journal.

भास्करभूषणम्

सूर्यपण्डितविरचितम् ।

पश्यन्जन्मान्यनेकान्यनवरतमुदद्दक्षिणे शुक्लकृष्णे
वर्षार्धाभ्यां गती द्वे प्रजनयति जने मुक्तिभुक्तिप्रधाने ।
यद्देवत्वं महत्त्वं कथमपि सवितुस्तद्वरेण्यं च तेजो
वेदो वेदांशुमाली स जयति जगतस्तस्थुषश्चायमात्मा ॥ १ ॥
अस्माकं कवितारसेन सविता देवः प्रसन्नो भवान्
संसारादविता स एव भविता चेत्तत्किमन्यश्रमैः ।
मोहे तीव्ररणे वपुर्वितरणे यच्छन्ति केचिद्गतिं
जानीमस्तरणे भवार्तितरणे पोतं तवानुग्रहम् ॥ २ ॥

अथोदयवर्णनम् ।

सिञ्चिन्सिन्दूरपूरैः सुरपतिककुभं कोकलोकं विशोकं
पूर्वं सर्वं प्रकुर्वन् प्रबलतमतमस्तोममव्योमसंस्थम् ।
संकोचं पङ्कजानां तदनु विदलयन्शीलयन्शैलमौलीन्
विश्वं व्यापारयन्सन्निजविधिषु महानेष भास्वानुदेति ॥ ३ ॥

विकलितं सकलं गुरुनिद्रया
सपदि जागरयन्करमुद्रया ।
जनयतीव जगद्दिननायकः
सुमदयन्विधिरूपतयानया ॥ ४ ॥

कारागेहेषु देहेष्विह निशि विधिनापीन्द्रियद्वारदत्तां
निद्रां विद्राव्य मुद्रामतितरनिपुणैः स्वैः करैः कुञ्चिताग्रैः ।
जीवन्निबन्धभाजः प्रचुरकरुणया मोचयन्गोचरेषु
स्वेषु व्यापारयन्सन्प्रतिदिवसमसौ भानुमानभ्युदेति ॥ ५ ॥

असितमभिसमन्तात्साधु संध्यारुणान्तं
प्रविकसदुडुपंक्तिव्यक्तमुक्ताफलाङ्कम् ।
अनुदिनमधिरूढे स्यन्दनं सप्तसप्तिं
सवितरि सवितानं व्योम धाता विधत्ते ॥ ६ ॥

गहनगगनगङ्गानीरपूरादपारे
नभसि सरसि तारापुण्डरीकान्यमूनि ।
प्रतिदिनमुदयन्ति प्रातरुत्थाय तानि
स्वयमयमिह हंसस्तूर्णमश्नन्प्रयाति ॥ ७ ॥

आलोकाचलमौलिमालिनमिनं कोपादिवालोहितं
दृष्ट्वा सान्द्रतमं तमः प्रचलितं भीत्या दिगन्तान्प्रति ।
संत्यक्ताश्चकितेन तेन शिशवोऽप्यत्यन्तमुग्धाश्च ये
तेऽमी भृङ्गमिषाद्विशन्ति बहुशः पङ्केरुहाभ्यन्तरे ॥ ८ ॥

विधुर्विधुरयोषितो निरपराधमुद्बाधते
कुतः प्रतिदिनं तिमिरमेतदुद्वाहते ।
मयि त्रिभुवनाधिपे चिरमितीव कोपायिते
निजे वपुषि भानुमानरुणिमानमालम्बते ॥ ९ ॥

हर्षोत्कर्षादिवासावुदयति दयिते वर्धते लज्जितेव
पश्यत्यात्मानमुच्चैः स्थगयति च पुरस्कृत्य कञ्चित्पदार्थम् ।
भीतेवास्मिन्प्रदीप्ते कथमपि च वपुश्छादयन्ती स्वकीयं
स्त्रीवच्छाया कुलीना भजति निजपतिं भानुमन्तं चिरेण ॥ १० ॥

संध्यासिन्दूरपूराञ्चितरुचिरघटं स्वर्धुनीशुण्डिकाग्र-
स्फूर्जत्सूत्कारकीर्यद्गगणभरपयोबिन्दुसंदोहसिक्तम् ।
बिभ्रद्बालेन्दुरेखासृणिममररिपूञ्जेतुमारात्खरांशु-
र्याति प्रारुह्य तुङ्गं गगनगजममुं विश्वविश्रामभूमिः ॥ ११ ॥

अत्यन्तं सुरवर्त्मवर्त्मनि परिश्रान्तार्कवाजिव्रज-
स्फूर्जत्फूत्कृतिफेनबिन्दुनिकरः सत्तारकाणां गणः ।
तेषां ह्यश्रमबीजलेहनविधौ धाता सुधादीधिते-
र्बिम्बं संप्रति सैन्धवाश्मशकलं सत्कर्मणा निर्ममे ॥ १२ ॥

अथ मध्याह्नवर्णनम् ।

मध्यंदिने तद्विविधैरुपायैः
पानीयपानाददनादनार्तम् ।
संतर्पयन्विश्वमनन्तशक्ति-
रनन्तरूपेण दिनाधिनाथः ॥ १३ ॥

पीतं वारि पिपासितैर्द्युसरितस्तत्सप्तिभिः सप्तभिः
पाथः सारथिभिर्गृहीतमवनेः पातालतस्तत्करैः ।
पान्थैः पार्थिवसैनिकैरिव जगन्नाथस्य तिग्मद्युते-
र्बिम्बेऽस्मिन्नविलम्बमम्बरगिरेर्मूर्धानमारोहति ॥ १४ ॥

यस्मिन्मूर्धाभिषिक्ते प्रतपति तरणौ भूर्भुवःस्वर्जनानां
छायाव्याजाद्दिवषां प्रणमति चरणौ पातकं जातकम्पम् ।

मा वादीमऽपराधं चिररचितमिति स्वामिनं तत्कृपार्द्रो
लोकोऽप्यद्यापि साधुः प्रकटयति न तत्कोऽपराधोऽस्ति भानोः ॥ १५ ॥

प्राचीपश्चिमयोरुदग्यमदिशोः पत्न्योः सपत्न्योः कृते
मध्याकाशमवस्थितो दिनमणिर्दत्ते विभज्याम्बरम् ।
प्रीतिं दर्शयितुं समामिह समं दृष्ट्वैतदीर्ष्याकुला
छायास्यैव वधूरुपैति तनुतां पत्युर्निजोल्लङ्घनम् ॥ १६ ॥

अथ सायंसमयवर्णनम् ।

सायं समये संवृतसकलार्थं जगदिदं भानुः ।
निद्रामिषादकस्माच्छंकररूपेण संहरति ॥ १७ ॥

मार्ताण्डाभ्युदये प्रबोधवशतः प्रायः प्रकाशो भवेत्
संकोचश्च पुनः सुषुप्तिवशतस्तस्मिन्प्रतिष्ठां गते ।
नेत्राणां कमलोपमा समुचितैवोक्ता कवीन्द्रैरतो
भानोर्वाखिलचालकस्य गदिता वेदैः परब्रह्मता ॥ १८ ॥

एतावत्समयं मया सुगमया स्थित्या समालोकितः
सोऽयं सायमिहेक्षते न कुहचिद्धिग्जीवितेनाधुना ।
इत्थं क्लेशविशेषतोऽक्षियुगलं भूयः सुषुप्तिच्छलात्
संकोचं समुपैति चातिजडतां भास्वत्यधः प्रस्थिते ॥ १९ ॥

वारुण्याः संसर्गादग्रेसरसैनिकाः कराः सवितुः ।
कृतशिशुशशाङ्कचषकाः प्रयान्ति ननु लोहिताकृतिताम् ॥ २० ॥

चिरं दूरं याते सवितरि जगद्भर्तरि परं
समन्तादेतस्मिन्प्रसरति तमस्तस्करगणः ।
निराकर्तुं चैनं प्रभवति रवेः सेवकवरो
गृहेभ्यः प्रत्येकं हुतभुगभितो दीपकमिषात् ॥ २१ ॥

प्रविष्टे पश्चिमाम्बोधिं मार्तण्डे वडवानलः ।
तमः संध्यामिषादेष बहिर्निस्सरति स्फुटम् ॥ २२ ॥

दृष्ट्वा तीव्रकरं प्रविष्टमुदधिं रक्तं प्रकोपादिव
त्रस्ता ये वडवानलस्य शिशवस्तूर्णीं बहिर्निःसृताः ।
आत्मानं स्थगयन्ति नूनमभितो लोके प्रदीपच्छलात्
प्रत्यागारममी पुनस्तदुदये दीनां दशां यान्ति च ॥ २३ ॥

स्नात्वा पश्चिमसागराम्भसि करग्राहेण सूर्यार्पितां
भूच्छायाप्रभवां निशासहचरीं प्राप्यानिशं क्रीडति ।

व्योम्न्यानीललतागृहे परिपतत्ताराप्रसूनोच्चये
लोकानां नयनोत्पलानि सहसा संकोच्य कामं शशी ॥ २४ ॥

असिततनुरकस्मात्तारकाचूर्णचिह्ना
गगनगिरिदरीतो यामिनी यातुधानी ।
व्रजति भजति दोषान्मूर्च्छयन्ती च लोकान्
विहरति विधुबिम्बं कन्दुकं संविधाय ॥ २५ ॥

पीत्वा पाथो भोगवत्याः खरांशोः
सप्ताश्वानां संभ्रमोऽभूदधस्तात् ।
मन्दाकिन्यास्तोयसौरस्यसाम्या-
न्निःसंदेहास्ते तदारोहमार्गात् ॥ २६ ॥

दृष्ट्वाग्रेसरसैनिकानभिनभस्तीव्रप्रतापान्करान्
मार्तण्डस्य महीपतेः प्रचलितानुच्चैर्भयार्ता भुवः ।
छाया नव्यवधूर्विधाय रजनीत्यात्माभिधानान्तरं
धावन्ती विपरीतदिश्यविरतं चन्द्रं विधत्ते पतिम् ॥ २७ ॥

भर्तान्तर्मलिनोऽन्तरा बहिरपि ख्याता च या यत्सुता-
श्चत्वारः प्रहराः प्रहारचतुराः सद्यो वियोगिव्रजे ।
शोचन्तीमथ चक्रवाकयुवतीमम्भोजिनीं चान्वहं
या नाश्वासयति क्षणं मुहुरतो दैवेन सोत्सार्यते ॥ २८ ॥

अथायनचर्या ।

नित्यं याम्याध्वनीनो यदयमहरहस्तद्धनिष्यन्त्यशेषा-
नेषान्लोकान्हि मानी ननु तुहिनगिरेरापतन्ती समन्तात् ।
औदीच्याध्वानुयायी यदि तदिह भवेद्दक्षिणोत्थान्निदाघा-
दार्तिस्तस्माद्विवस्वानतितरकरुणो पात्युदग्दक्षिणे च ॥ २९ ॥

देवे यात्युत्तराशामनुपदमवनी नव्यधान्यानि सूते
धान्यान्यन्यानि याम्यां चलितवति यतो विश्वसंतर्पणेन ।
स्यादानन्दोऽस्य नान्यैरुपचरणशतैर्विश्वनाथस्य भानो-
र्येनाहं भूतधात्री जगति वसुमतीत्येवमालोचयन्ती ॥ ३० ॥

स्वेनोष्मणावतप्ताः सप्ताश्वकराः स्पृशन्त्येते
यमदिशि मलयजशैलं तुहिनाचलमुत्तराशायाम् ॥ ३१ ॥
मर्यादे जलराशी यस्य स्तो दक्षिणोत्तरायनयोः ।
इति लोकं जलराशी कुलीरमकरौ निवेदयतः ॥ ३२ ॥

याम्योत्तरावधिगते दिननायकस्य
मार्गेऽभवन्वसतयो विविधोपचाराः ।
चित्राम्बराभरणभूतिविभूषितस्य
यास्तद्वशाज्जगति षड्ऋतवः स्युरेते ॥ ३३ ॥

अथ ऋतुवर्णनम्

भिन्नर्तुयोगादिव कामिनीभिः
काष्ठाभिरष्टाभिरसौ विवस्वान् ।
अनेकवेषाम्बरभूषणाद्यै-
र्लीलाविलासानिह संविधत्ते ॥ ३४ ॥

मोचयति नक्रवदना दिनमतिदीनं सुदर्शनेनैव ।
भूयो भगवान्भानुर्हरिरिव गजयूथपं ग्रस्तम् ॥ ३५ ॥

याम्यायनाद्भास्वति संनिवृत्ते
मुनेरगस्त्यस्य निजात्मजस्य ।
क्षेमस्थितिं प्रष्टुमिवाग्रतोऽभूत्
कुम्भोऽयमम्भो वितरन्निहास्मै ॥ ३६ ॥

पृष्टाकृष्टोरुकुम्भः स्वयमयभितः स्वधूर्नीनीरलीनं
पीनं मीनं दिधीर्षुर्विरचयति पुरो रश्मिजालं दिनेशः ।
दृष्ट्वैतत्संविधत्ते विरहिजनमनो मीनसंघातघातं
यत्पीयूषामिषांशुर्वियति विधुरमुं कौशलं दर्शयन्स्वम् ॥ ३७ ॥

मीनकेतनदशामनुयायि-
न्यंशुमालिनि मनोहरवेषे ।
औषधीष्वपि च पुष्पवतीत्वं
किं पुनर्नरसुरप्रमदासु ॥ ३८ ॥

परितः परिपूरयितुं पुरंदराशां च वर्धयितुम् ।
दिनमनु दिनं स्वकीयं निजोच्चपदवीं प्रयात्यर्कः ॥ ३९ ॥

स्वोच्चाभिलाषिणि परं दिननायकेऽस्मिन्
रात्रिर्भयादिव दिनस्य गृहीतमंशम् ।
प्रादात्स्वयं च परिहाय महत्त्वमुच्चै-
र्योगार्जवाहितमतिः समुपैति साम्यम् ॥ ४० ॥

आश्विनीमुपगते दिननाथे
मन्मथोन्मथितबुद्धिरिहासीत् ।

तत्तुरङ्गनिकरः खलु तस्मात्
मन्दमन्दमुपयाति रथोऽस्य ॥ ४१ ॥

स्वस्वामिनं दिनेशं सम्प्रति संप्रस्थितं स्वगृहात् ।
संप्रापयितुमिवाग्निर्निदाघमिषतोऽनुयातीह ॥ ४२ ॥

ईशानीश्रयणाद्वृषेण गमनादुच्चैर्जलाकर्षणा-
दुग्रत्वादिति शैववेषकितवात्कान्तां प्रयान्तं रविम् ।
औदीचीं दिशमाकलय्य सकलाः क्षुब्धाः प्रलब्धाशया
आसन्प्रज्वलिता इवान्यककुभः सद्यः सपत्नीरुषा ॥ ४३ ॥

संसक्ते तरणौ सहोत्तरदिशां स्वेशे रहस्युद्धताः
केचिद्दीधितयोऽस्य नीरमहरन्भूमेः समन्तात्पुनः ।
व्यावृत्तिं मिथुनादथोर्ध्वमनिलोन्नीतं रजश्चावने-
र्दृष्ट्वामी भयभङ्गुरा इव करा वर्षन्ति भूयो जलम् ॥ ४४ ॥

क्ष्मामेके तापयन्तः प्रबलजलभरैः कुर्वते सेकमेके
वीक्ष्यान्तर्दाहमन्यैः कृतमथ युयुधुस्ते मिथोऽखर्वगर्वाः ।
सान्द्रैर्वर्षाश्मघातैः पृथुनिनदतडित्पातनैश्चेन्द्रगोपा-
स्तत्रास्रग्बिन्दवोऽमी दिवि तरणिकरा एवमेते रमन्ति ॥ ४५ ॥

अभितो भानुभिस्तीव्रैः कुलीरं व्याकुलीकृतम् ।
मूर्छितं सिञ्चतीवार्कः स्वकरैरम्बुवर्षिभिः ॥ ४६ ॥
अर्केण कर्कटेऽस्मिन् जलचारित्वात्सजातीये ।
करजालेनाकलिते परितः क्रोशन्ति मण्डूकाः ॥ ४७ ॥

गलद्भिर्गर्जद्भिर्जलदकरिभिश्चारुतुरगै-
र्मरुद्भिर्विद्युद्भिः स्फुरितकरवालैरभिनभः ।
स्वसेनासंनाहैः करविधृतजम्भारिधनुषो
नमन्ति त्वां देवाः सुरवरदसिंहासनगतम् ॥ ४८ ॥

सत्सिंहासनसार्वभौमपदवीं संप्राप्य मित्रोऽप्यसौ
नाकाशाय न तेजसे न मरुते किञ्चिद्ददौ नाम्भसे ।
भूम्यै त्वर्पितवान्यतस्तरुलताश्चस्माक्रमो मारुते
पातोऽग्नौ मलिनं नभः समभवत्कालुष्यमप्सु स्थितम् ॥ ४९ ॥
वर्षा नव्यवधूं स्वयंवरविधावैरावतारोहिणीं
मालामिन्द्रधनुर्मयीं दिनमणेः कण्ठेऽर्पयन्तीमिमाम् ।
इन्द्रोऽश्वेन ययाववेक्षितुमभूच्छृण्वन् स वृद्धश्रवा-
श्चण्डाडम्बरमब्दगर्जनभवं वाजी तथोच्चैःश्रवाः ॥ ५० ॥

प्रयोजनमृतेऽसकृन्न खलु गर्जतीतस्ततः
पयोदपटलागमे कलयतीदमत्यूर्जितम् ।
स्वयं तदिह केसरी व्रजति भानुमद्देहतां
स्थिरत्वमगमत्ततो हरिपदाभिमानोऽप्यभूत् ॥ ५१ ॥

क्षारं राकाशशाङ्कं सुरसरिति जलं चातपं प्राप्य तीव्रं
ताराम्भोबिन्दुसेकाज्जलधरमलिनं स्वाम्बरं क्षालयन्त्यः ।
संध्यारागाङ्गरागा नवयुवतिकरग्राहदत्तावधाने
सज्जन्ते पद्मिनीशे वरवसनविभूषाभिराशा पुरंध्र्यः ॥ ५२ ॥

समतां रजनीदिनयोः शीतातपयोस्तथा गदोत्सवयोः ।
विज्ञातुमंशुमाली कलयत्यमलां तुलां स्वकरैः ॥ ५३ ॥

यद्यपि करधृततुलया भानुर्दत्ते विभज्य समसमयम् ।
न तथाप्यहःक्षणदयोः शाम्यति नैसर्गिकं वैरम् ॥ ५४ ॥

संप्रस्थिते प्रेयसि दक्षिणाशां
भानौ वियुक्ताभवदुत्तरा दिक् ।
तया तमाकारयितुं नियुक्ता-
नुयाति दूतीव चिरं हिमानी ॥ ५५ ॥

पश्यन्वृश्चिकपुच्छं करसंकोचं करोति चण्डकरः ।
जगदपि तदधीनमिदं तनुते तनुतां दिनं चैतत् ॥ ५६ ॥

लसदुत्तरावियोगादिदमत्यल्पार्तिदं चेति ।
कथयन्निव युवलोकं वृश्चिकपुच्छं रविः स्पृशति ॥ ५७ ॥

यदीयसदनं व्रजत्यखिलशक्तिमान्भानुमान्
धनुर्धरपुरःसरः सकलदेवताविग्रहः ।
निधाय निजपृष्ठतः प्रणयिनीं हिमानीमिमा-
मतोऽयमखिलैर्जनैरिह हुताशनः सेव्यते ॥ ५८ ॥

उपप्लुतं प्राग्यमदंष्ट्रयेद-
माकर्ण्य विश्वं तरणिर्जनेभ्यः ।
लोकान्तकाशामभितो नियन्तुं
कुर्वन्करे कार्मुकमेति भानुः ॥ ५९ ॥

एकं धनुः परमनेककराः खरांशोः
प्रत्येकमूर्जितवशादभिमानभाजः ।
कस्मिन्नियोज्यममुनेति विचार्य चित्ते
धाता चकार षडशीतिमुखं तदेतत् ॥ ६० ॥

अह्नः पतिर्वह्निगृहं गतोऽस्मा-
दुत्कर्षशाली शिखिनां गणोऽभूत् ।
कृपीटयोनिर्जठरान्तरस्थो
यत्पाचयत्याशु गृहीतमन्नम् ।। ६१ ।।

वर्षास्वङ्कुरयंस्तरून्समभितो वर्षन्पयः स्वाम्बुभिः
शीते पल्लवयन्पुनः कुसुमितान्कुर्वन्वसन्तागमे ।
ग्रीष्मर्तौ परिपाचयन्नसमसौ तेषां फलोत्पत्तये
तस्मादर्कमृते भवेत्सुरवरः कोऽन्यो जगज्जीवनम् ।। ६२ ।।

अथ स्तवः ।

अन्तःसंतापहारिंस्तव जगति विना यस्य रम्येन नाम्ना
नाम्नायः स्तौति किञ्चित्परिचितमितरत्सर्वबीजात्मकेन ।
स त्वं सत्त्वावतार श्रितभवनविभो भूरिजन्मश्रमार्तं
मार्तण्ड त्वं स्वधाम्ना सुखय निरवधिव्याधिमाधिं निहत्य ।। ६३ ।।

चन्द्रायांशुप्रकाशं प्रतिफलनमिषादीश सर्वोपकारिन्
त्वं पीयूषं मयूखैर्वितरसि तरणे नैजमोजश्च नूनम् ।
नोचेत्तस्मिन्नकस्माद्विमलजलमये कश्चकोरादरः स्यात्
को वा नैशान्धकारावलिदलनपटुः सत्प्रकाशावकाशः ॥ ६४ ॥

केतुर्मे दुःखहेतुः शनिरशनिरसौ राहुराहूतखेदो
भौमः कौमारचेष्टः कविरविनयवान् बिन्दुरिन्दुर्विषस्य ।
चान्द्रिः सान्द्रकृताश्रीर्गुरुरपि कुरुते विग्रहं निग्रहं वा
तावद्यावद्ग्रहेन्दो न भवति भगवान् भानुरेकादशस्थः ।। ६५ ।।

सुचरितदुरितानां पूर्वजन्मार्जितानां
कथयसि परिपाकं त्वं कृपालोऽखिलस्य ।
समविषमगृहस्थोऽप्रार्थितोऽप्येवमेता-
मुपकृतिममरेशः कोऽपरः संविधत्ते ।। ६६ ।।

अहरहरुदयास्तैर्यत्समस्तस्य जन्तो-
र्गलितमफलमायुः कीर्तयस्यार्तिहारिन् ।
तदपि महदविद्यामोहितो नो हितं स्वं
स भजति भगवंस्ते कः प्रभुत्वापराधः ।। ६७ ।।

यो देवायतनप्रदक्षिणगतिः संकल्पशून्योऽपि सन्
नित्यं विष्णुपदाश्रयस्त्रिजगतामात्माप्यसौ भानुमान् ।

यः सर्वत्र समोऽपि चक्रमिथुनाम्भोजैकविश्रामभूः
किं त्वात्मानुभवैषिणामिह सतां तोषोपदेशोऽप्यसौ ॥ ६८ ॥

प्रत्यक्षोऽपि च यः समस्तजगतां सर्वागमागोचरो
दुष्प्रापस्त्रिदशर्षिहृत्यभिरुचिं यः कोकलोकेऽम्बुजे ।
नित्यं वास्तमयन्सदोदिततनुर्गच्छन्नपि स्थावरो
यश्चैकोऽपि भवेत्त्रयीतनुरसौ देवाधिदेवो रविः ॥ ६९ ॥

पद्मकुड्मलकुलं ननु धन्यं
चक्रवाकमिथुनं च जगत्याम् ।
भानुमत्यखिमदैवतपूज्ये
यच्चिराय कुरुते दृढभावम् ॥ ७० ॥

एकेऽनुमानगम्या अपरे निगमात्पुराणतस्त्वपरे ।
तेभ्यः फलमपि तद्वन्न तथा भास्वान्फलं चास्मात् ॥ ७१ ॥

दानं ध्यानावधानं दिशति भगवते दास्यमौदस्यमङ्गे
मूर्तिर्भूतार्तिहन्त्री भवति च भवतः कीर्तिता कीर्तिरेषा ।
भानो भानं च मानं दिशति तव गुणाकर्णनं वर्णनं वा
तस्मात्त्वद्भक्तिभाजस्त्रिभुवनजठरे धन्यमन्यं न मन्ये ॥ ७२ ॥

अपरोक्षत्वादपरामपराधपराहतानां च ।
तरणिं विनान्यसरणिं संसाराब्धौ न पश्यामः ॥ ७३ ॥

पीत्वा यदुद्गीर्णमदस्तमिस्रमर्कांशुभिर्नीलमभून्नभोऽस्मात् ।
संप्राप्य गेहावृतमन्धकारं यथा मषीमुद्गिरति प्रदीपः ॥ ७४ ॥

गभस्तिना ग्रस्तमिदं तमिस्रं रोषाद्भयात्प्राप्तमपथ्यभावम् ।
यत्तन्नृलोकेऽवततार कामं मनोभिरामं यमुनाच्छलेन ॥ ७५ ॥

वर्चस्तावकमर्च्यमम्बुजजनौ सत्कौस्तुभच्छद्मना
कण्ठेऽधारि विकुण्ठवासिविभुना तेजो हरेणाक्षिणि ।
स्वक्रोडान्तरधायि वारिनिधिना वह्निश्चिरं वाडवः
स्वामिन्कोऽत्र न भूषितस्त्रिभुवने युष्मद्विभूत्या नरः ॥ ७६ ॥

जिष्णोरक्ष्णां सहस्रे प्रतिनयनमधिष्ठानमास्ते गभस्ते
किं चाजस्रं सहस्रद्वयमुरगपतेस्तत्र च श्रीमदोजः ।
भूषान्तर्मस्तकानां प्रचुरमणिमिषात्तेजसा स्वेन दत्से
वत्से किं मादृशे त्वं न वितरसि विभो चित्प्रकाशं स्वकीयम् ॥ ७७ ॥

मर्त्यस्ते तरणे गुणान्गुणगणं जात्वेकया जिह्वया
तस्मै त्वं तु सहस्रसंमितकरैर्दत्से निरम्येति चेत् ।

तत्स्तोता द्विसहस्रसंख्यरसनस्तावत्करासंभवा-
च्चेत्स्वं दास्यसि तद्भयात्तमकरोदश्रोत्रमात्मोद्भवः ।। ७८ ।।

सहस्रास्यैः स्तोतुर्भुवि भुजगभर्तुर्दिनमणि-
र्मणिव्याजादोजोभरजनिसहस्राभयकरान् ।
अदान्मौलिव्राते ऽवनितलभरोद्धारचतुरान्
सरित्स्रोतोनीराशयगणसमुच्छोषणवशान् ।। ७९ ।।

अथैश्वर्यम् ।

आरूढः सप्तसप्तिं रथमथ रुचिरं सूरसूताख्यसूतं
द्वावप्युत्तानपादावुडुगणवृतनोपान्तसंकेतकेतू ।
सेनासंनाहनाथं क्षितिसुतमभितो बन्दिनं चेन्दुसुतं
कृत्वा भानुर्भुनक्ति त्रिभुवनभवने राज्यमेकातपत्रम् ।। ८० ।।

पुरुहूतपुरोहितः सदस्यः
कविरास्ते दनुजार्चितोऽपि यस्य ।
अमृतांशुरनुत्तमः कलावान्
स हि भास्वान्जयतीह सार्वभौमः ।। ८१ ।।

अथ प्रतापः ।

भानोस्तीव्रकरप्रतापहुतभुग्निष्टप्तदेहः पुरा
प्रच्छन्नः पुरभित्तृतीयनयने कल्पान्तकालानलः ।
स्वर्गङ्गाहिमरश्मिसंनिधिजुषि प्रायो यतः शंभुना-
प्यार्तत्राणकृपावता पुनरसावद्यापि नोन्मील्यते ॥ ८२ ॥

यस्य विक्रमहुताशनशुष्कां
स्वर्धुनीं समपहाय कथंचित् ।
कच्छपः सुतलमाप भयार्तो
मान्मथं ध्वजमगात्पृथुलोमा ।। ८३ ।।

ब्रह्माण्डावधिरर्को लीलादेहः प्रकाशात्मा ।
तत्कीर्तेः प्रचलन्त्याः कोऽवधिरस्तीति नो विद्मः ॥ ८४ ॥

ये स्युः सुरासुरनराः स्वयमप्रकाशा-
स्तेषां भवत्सुयशसा जगति प्रकाशः ।
यस्य प्रकाशत इदं जगदस्ति सर्वं
कस्तद्यशःप्रसरवर्णनशक्तिभाक् स्यात् ।। ८५ ॥

विश्वासादग्रजन्मानस्त्वदुपासनसंभवान् ।
यच्छन्त्यर्घ्यमिषादर्क संसाराय जलाञ्जलीन् ॥ ८६ ॥

अर्घ्यमनर्घ्यं मन्ये त्वय्यर्पितमग्रजन्मभिर्भानो ।
केवलमम्भोऽञ्जलिना यल्लभ्यं शाश्वतं धाम ॥ ८७ ॥

विश्वं विधातुमध्वान्तमध्वान्तं प्राप्तवान् रविः ।
इन्दुमायातु च ध्वान्तमतोऽन्तः कुरुते महीम् ॥ ८८ ॥

कालात्मना यो जगतः पितामहो
महोमयत्वेन च तत्प्रवर्तकः ।
प्रकाशहेतुर्जगतः प्रभावतः
प्रभावतोऽसौ जगतामधीश्वरः ॥ ८९ ॥

भूच्छायाच्छन्नदृशो भुवि मन्यन्ते गभस्तिमस्तमितम् ।
आत्मानं परमज्ञा सदोदितं न जानन्ति ॥ ९० ॥

उदयाद्युपाधियोगान्निरुपाधौ भानुमत्यज्ञैः ।
बाल्युवस्थविराद्यास्तिस्रोऽवस्थाः प्रकल्प्यन्ते ॥ ९१ ॥

आत्मनि नित्ये च विभौ मृत इति शोचन्त्यनेकशो मूढाः ।
तद्वदनस्तमितेऽर्केऽस्तमयं मोहात्प्रभाषन्ते ॥ ९२ ॥

सवितर्युदयति लोकः करोति कर्माण्यभीष्टानि ।
न च तानि कारयति वा कुरुतेऽर्कः कर्मसाक्षी सः ॥ ९३ ॥

स्वपरप्रकाशकत्वात्सदोदितत्वाच्च साक्षित्वात् ।
विश्वप्रवर्तकत्वात्परात्मभान्वोः कथं भेदः ॥ ९४ ॥

प्रतिबिम्बस्थं ज्योतिर्यस्य पदार्थान्प्रकाशयति ।
तस्यात्मत्वं वेदे प्रतिपादितमत्र किं चित्रम् ॥ ९५ ॥

सर्वज्ञेषु सुरेषु सत्स्वपि पृथक्ख्यातप्रभावेषु वा
नैवात्मानमृते यथा जडजगत्संजीवनं युज्यते ।
तद्वच्चन्द्रकुजज्ञसूरिभृगुजछायाभुवां वासरे-
ष्वर्केनैव समुद्गमः क्षितितले नैतत्स्वरूपैः क्वचित् ॥ ९६ ॥

योऽर्थः सर्वागमानां परमपरिणतः कर्मनैष्कर्म्यमार्गे
सा गायत्रीत्युपास्तिः सवितुरथ तदंघ्रिद्वयं कर्मतन्त्रम् ।
तस्याः पादश्चतुर्थः परमपदपरिप्राप्तये नूनमस्मात्
प्राज्ञैः किं वेतरस्माज्जगति सुरवरान्मानवैर्मृग्यमस्ति ॥ ९७ ॥

भूनेत्रान्तरमध्यपीठवसतिज्योतिर्यदर्कं भवे-
चेतश्चाद्रमसं तदोपरमते चेदत्र संयोज्यते ।

इत्थं योगिजनं निवेदितुमिव श्रान्तं पुनर्जन्मभि-
र्दर्शे दर्शयतीन्दुबिम्बविलयं भानुर्दयाम्भोनिधिः ॥ ९८ ॥

तेजोनिधे चेतसि मे निधेहि
प्रकाशय ज्ञानमिदं च धेहि ।
दिनेश दीनेषु दयां विधेहि
गतागतं जन्मभवं पिधेहि ॥ ९९ ॥

बाह्यतः सर्वदा सोऽहं सर्वदा सोऽहमन्तरे ।
यथा चरामि सुचिरं तथा नः शाधि भानुमान् ॥ १०० ॥

यः पञ्चायतनप्रसादविधये काव्यान्यथाष्टौ व्यधात्
तत्र त्रीणि हरेर्हरस्य तरणेरेकैकमम्बाजनेः ।
द्वे गौर्याः परिवर्णने स विधिवत्सूर्याभिधानः कविः
काव्यं भास्करभूषणाख्यमकरोज्ज्ञानाधिराजात्मजः ॥ १०१ ॥

इति श्रीदैवज्ञसूर्यपण्डितविरचितं भास्करभूषणं समाप्तम् ॥